योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०६५

पञ्चषष्टितमः सर्गः ६५

श्रीवसिष्ठ उवाच ।

ईषद्दृष्टो यथा तेन भिक्षुणा चेतसि भ्रमः ।

भूतं प्रयत्नमेवैष पृथक्कृत्वा सुपश्यति ।। १

सर्वस्याभासजीवस्य मृतिजन्ममयी स्थितिः ।

भवत्येव चिदाकाशरूपिण्येवाकृतिं गता ।। २

पृथक्कृत्यैक्यमभ्येति स्वात्मा संसारखण्डकम् ।

सर्व एव मृतो जन्तुः पृथक्स्वप्ननिभात्मकम् ।। ३

एवंततस्वरूपोऽपि देही चामोक्षमाकुलः ।

जीवयूथं मया तुभ्यं कथितं कथयाऽनया ।। ४

परात्प्रस्पन्दितात्मेति न भिक्षू राम केवलम् ।

मोहान्मोहान्तरं याति जीवोऽहरहरेव नः ।। ५

पर्वताग्रपरिभ्रष्टो ह्यधोध उपलो यथा ।

परमात्मपरिभ्रष्टो जीवः स्वप्नमिमं दृढम् ।। ६

पश्यत्यस्मादपि स्वप्नाद्याति स्वप्नान्तरं पुनः ।

स्वप्नात्स्वप्ने विनिपतन्मृषैवेदं दृढं किल ।। ७

परिपश्यति जीवोऽन्तर्माययया जर्जरीकृतः ।

क्वचित्केनचिदेवेह कदाचिदपि वा स्वयम् ।। ८

देहनाम्नोऽहमित्यन्तो मुच्यते स्वं प्रपद्यते ।

श्रीराम उवाच ।

अहो नु विषमो मोहो जीवस्यास्योपजायते ।। ९

यथा सुप्तस्य स्तोकेन नानाकारविकारया ।

मिथ्याज्ञानोग्रयामिन्या मायया निपतत्यलम् ।। १०

अहो नु खलु वैषम्यं भीमं निजवदुच्यते ।

भगवन्सर्वदा सर्वं सर्वदैव जगत्स्थितौ ।। ११

त्वया संभवतीत्युक्तं यथा तच्चानुभूयते ।

एवंगुणविशिष्टात्मा तन्मोहात्मा स भिक्षुकः ।। १२

क्वचिदस्ति न वास्त्यन्तरालोक्य कथयाशु मे ।

श्रीवसिष्ठ उवाच ।

अद्य रात्रौ समाधिस्थस्त्रिलोकीमठिकामिमाम् ।।१३

भिक्षुरेकोऽस्तिनास्तीति प्रेक्ष्य प्रातर्वदाम्यहम् ।

वाल्मीकिरुवाच ।

मुनौ चैवं कथयति बहिर्मध्याह्नडिण्डिमः ।। १४

उदभूत्प्रलयक्षुब्धघनगर्जितमांसलः ।

तत्यजुः पादयोस्तस्य पुष्पाञ्जलिपरम्पराः ।। १५

मृषाः पौरा विटपिनः पुष्पं वातधुता इव ।

पूजयित्वा मुनिश्रेष्ठानुदतिष्ठन्स्वविष्टरात् ।। १६

सभा तदनु सोत्तस्थौ सप्रणामपरम्परा ।

क्रमेण ह्यस्तनेनैव जग्मुः खेचरभूचराः ।। १७

स्वास्पदेषु यथाशास्त्रमहर्व्यापारमादृताः ।

सर्वे संपादयामासुर्निजधर्मं क्रमोचितम् ।। १८

चिन्तयन्तो मुनिप्रोक्तं महीचरनभश्चराः ।

ज्ञानं क्षपां क्षणमिव निन्युः कल्पमिवापि च ।। १९

प्रातः पुनः प्रसृतकार्यपरम्परेऽस्मि-

ञ्जाते जने खचरभूचरभूतसङ्घः ।

आख्यानलोकरचनेन तथैव तस्था-

वन्योन्यसंवदनपूजितपूज्यलोकः ।। २०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० विद्योतरविस्मयवर्णनं नाम

पञ्चषष्टितमः सर्गः ।।६५।।